# संक्षेप रामायणम् *saṅkṣepa rāmāyaṇam*

वल्मीकेः आदिकाव्य रामायणे बालकाण्डे प्रथमः सर्गः *valmīkeḥ ādikāvya rāmāyaṇe bālakāṇḍe prathamaḥ sargaḥ*

*Rāmulu Gajavāḍa Saṁskṛtam Teacher*

तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।

नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥ १

***tapaḥ-svādhyāya-nirataṁ tapasvī vāg-vidāṁ varam***
***nāradaṁ pari-papraccha vālmīkir-muni-puṅgavam*** || 1

कोन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।

धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥ २

***konvasmin sāmpratam̐ loke guṇavān kaśca vīryavān*** **|**
***dharmajñaśca kṛtajñaśca satyavākyo dṛḍhavrataḥ*** **|| 2**

चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।

विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ॥ ३

***cāritreṇa ca ko yuktaḥ sarva-bhūteṣu ko hitaḥ*** **|**
***vidvān kaḥ kaḥ samartha-śca kaścaika-priya-darśanaḥ*** **|| 3**

आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः ।

कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥ ४

***ātmavān ko jita-krodho dyutimān ko'anasūyakaḥ*** **|**
***kasya bibhyati devāśca jātaroṣasya saṁyuge*** **|| 4**

एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे।

महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम्॥ ५

*etadicchāmyahaṁ śrotuṁ paraṁ kautūhalaṁ hi me|*
*maharṣe tvaṁ samartho'si jñātumevaṁvidhaṁ naram||* **5**

श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः।

श्रूयतामिति चामुन्त्रिय प्रहृष्टो वाक्यमब्रवीत्॥ ६

*śrutvā caitattrilokajño vālmīker-nārado vacaḥ|*
*śrūyatāmiti cāmuntriya prahṛṣṭo vākyamabravīt||* **6**

बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः।

मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः॥ ७॥

*bahavo durlabhāścaiva ye tvayā kīrtitā guṇāḥ|*
*mune vakṣyāmy-ahaṁ buddhvā tairyuktaḥ śrūyatāṁ naraḥ*

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।

नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी॥ ८

*ikṣvākuvaṁśaprabhavo rāmo nāma janaiḥ śrutaḥ|*
*niyatātmā mahāvīryo dyutimān dhṛtimān vaśī||* **8**

बुद्धिमान् नीतिमान् वाग्मी श्रीमान् शत्रुनिबर्हणः।

विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः॥ ९

*buddhimān nītimān vāgmī śrimān śatrunibarhaṇaḥ|*
*vipulāṁso mahābāhuḥ kambugrīvo mahāhanuḥ||* **9**

महोरस्को महेष्वासो गूढजत्रुररिन्दमः ।

आजानुबाहु स्सुशिराः स्सुललाट स्सुविक्रमः ॥ १०

*mahorasko maheṣvāso gūḍhajatrurarindamaḥ*।
*ājānubāhu ssuśirāḥ ssulalāṭa ssuvikramaḥ* ।। 10

समः स्समविभक्ताङ्ग स्निग्धवर्णः प्रतापवान् ।

पीनवक्षा विशालाक्षो लक्ष्मीवान् शुभलक्षणः ॥ ११

*sama ssamavibhaktāṅgaḥ snigdhavarṇaḥ pratāpavān*।
*pīnavakṣo viśālākṣo lakṣmīvān shubhalakṣaṇaḥ* ।। 11

धर्मज्ञ स्सत्यसन्धश्च प्रजानां च हिते रतः ।

यशस्वी ज्ञानसम्पन्नः सुचिर्वश्य स्समाधिमान् । १२

*dharmajña ssatyasandhaśca prajānāṁ ca hite rataḥ*।
*yaśasvī jñānasampannaḥ sucirvaśya ssamādhimān*। 12

प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।

रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ॥ १३

*prajāpatisamaḥ śrīmān dhātā ripuniṣūdanaḥ*।
*rakṣitā jīvalokasya dharmasya parirakṣitā*।। 13

रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।

वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥ १४

*rakṣitā svasya dharmasya svajanasya ca rakṣitā*।
*vedavedāṅgatattvajño dhanurvede ca niṣṭhitaḥ*।। 14

सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिवान् प्रतिभानवान्।
सर्वलोकप्रिय स्साधुः अदीनात्मा विचक्षणः॥ १५

*sarvaśāstrārthatattvajñaḥ smṛtivān pratibhānavān*।
*sarvalokapriya ssādhuḥ adīnātmā vicakṣaṇaḥ* ।। **15**

सर्वदाऽभिगत स्सद्भिः समुद्र इव सिन्धुभिः।
आर्य स्सर्वसमश्चैव सदैक प्रियदर्शनः॥ १६

*sarvadā'bhigataḥ sadbhiḥ samudra iva sindhubhiḥ*।
*āryaḥ sarvasamaścaiva sadaika priyadarśanaḥ*।। **16**

स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः।
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव॥ १७

*sa ca sarvaguṇopetaḥ kausalyānandavardhanaḥ* ।
*samudra iva gāmbhīrye dhairyeṇa himavāniva* ।। **17**

विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः।
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः॥ १८

*viṣṇunā sadṛśo vīrye somavatpriyadarśanaḥ* ।
*kālāgnisadṛśaḥ krodhe kṣamayā pṛthivīsamaḥ* ।। **18**

धनदेन समस्त्यागे सत्ये धर्म इवापरः।
तमेवंगुणसम्पन्नं रामं सत्यपराक्रमम्॥ १९

*dhanadena samastyāge satye dharma ivāparaḥ* ।
*tamevaṁguṇasampannaṁ rāmaṁ satyaparākramam*।। **19**

ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम्।

प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया॥ २०

*jyeṣṭhaṁ śreṣṭhaguṇairyuktaṁ priyaṁ daśarathaḥ sutam* ।
*prakṛtīnāṁ hitairyuktaṁ prakṛtipriyakāmyayā* ।। **20**

यौवराज्येन संयोक्तुमैच्छत् प्रीत्या महीपतिः।

तस्याभिषेकसम्भारान् दृष्ट्वा भार्याऽथ कैकयी॥ २१

*yauvarājyena saṁyoktumaicchat prītyā mahīpatiḥ*।
*tasyābhiṣekasambhārān dṛṣṭvā bhārya'tha kaikayī*। **21**

पूर्वं दत्तवरा देवी वरमेनमयाचत।

वनवासं च रामस्य भरतस्याभिषेचनम् ॥२२

*pūrvaṁ dattavarā devī varamenamayācata*।
*vanavāsaṁ ca rāmasya bharatasyābhiṣecanam* ।। **22**

स सत्यवचनाच्चैव  धर्मपाशेन संयतः।

विवासयामास सुतं रामं दशरथः प्रियम्॥  २३

*sa satyavacanātccaiva  dharmapāśena saṁyataḥ*।
*vivāsayāmāsa sutaṁ rāmaṁ daśarathaḥ priyam*।। 23

स जगाम वनं वीरः प्रतिज्ञामनुपालयन्।

पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात्॥ २४

*sa jagāma vanaṁ vīraḥ pratijñāmanupālayan*।
*piturvacananirdeśāt kaikeyyāḥ priyakāraṇāt* ।। **24**

तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ।

स्नेहात् विनय संपन्नः सुमित्रानन्द वर्धनः ॥ २५

*taṁ vrajantaṁ priyo bhrātālakṣamaṇo-'nujagāma ha*।
*snehāt vinaya sampannaḥ sumitrānanda vardhanaḥ*।। 25

भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ।

रामस्य दयिता भार्या नित्यं प्राणसमा हिता ॥ २६

*bhrātaraṁ dayito bhrātuḥ saubhrātramanudarśayan*।
*rāmasya dayitā bhāryā nityaṁ prāṇasamā hitā*।। 26

जनकस्य कुले जाता देवमायेन निर्मिता ।

सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः ॥ २७

*janakasya kule jātā devamāyena nirmitā*।
*sarvalakṣaṇasampannā nārīṇāmuttamā vadhūḥ* ।। 27 ।।

सीताऽप्यनुगता रामं शशिनं रोहिणी यथा ।

पौरै रनुगतो दूरं पित्रा दशरथेन च ॥ २८ ॥

*sītā'pyanugatā rāmaṁ śaśinaṁ rohiṇī yathā*।
*paurai-ranugato dūraṁ pitrā daśarathena ca* ।। 28।।

शृङ्गिबेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।

गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥ २९ ॥

*śṛṅgiberapure sūtaṁ gaṅgākūle vyasarjayat*।
*guhamāsādya dharmātmā niṣādādhipatiṁ priyam* ।। 29 ।।

गुहेन सहितो रामो लक्ष्मणेन च सीतया ।

ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ॥ ३० ॥

*guhena sahito rāmo lakṣmaṇena ca sītayā*|
*te vanena vanaṁ gatvā nadīstīrtvā bahūdakāḥ* || **30** ||

चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ।

रम्यमावसथं कृत्वा रममाणा वने त्रयः ॥ ३१

*citrakūṭamanuprāpya bharadvājasya śāsanāt* |
*ramyamāvasathaṁ kṛtvā ramamāṇā vane trayaḥ* || **31**

देवगन्धर्वसङ्काशास्तत्र ते न्यवसन् सुखम् ।

चित्रकूटं गते रामे पुत्रशोकातुरस्तदा ॥ ३२ ॥

*devagandharvasaṅkāśāstatra te nyavasan sukham*|
*citrakūṭaṁ gate rāme putraśokāturastadā* || **32** ||

राजा दशरथः स्वर्गं जगाम विलपन् सुतम् ।

गते तु तस्मिन् भरतो वसिष्ठप्रमुखैर्द्विजैः ॥ ३३

*rājā daśarathaḥ svargaṁ jagāma vilapan sutam*|
*gate tu tasmin bharato vasiṣṭhapramukhairdvijaiḥ*|| **33**

नियुज्यमानो राज्याय नैच्छद् राज्यं महाबलः ।

स जगाम वनं विरो रामपादप्रसादकः ॥ ३४ ॥

*niyujyamāno rājyāya naicchad rājyaṁ mahābalaḥ*|
*sa jagāma vanaṁ viro rāmapādaprasādakaḥ* || **34** ||

गत्वा तु स महात्मानं रामं सत्यपराक्रमम्।

अयाचद् भ्रातरं राममं आर्यभावपुरस्कृतः॥ ३५

*gatvā tu sa mahātmānaṁ rāmaṁ satyaparākramam|*
*ayācad bhrātaraṁ rāmaṁ āryabhāvapuraskṛtaḥ||* 35

त्वमेव राजा धर्मज्ञः इति रामं वचोऽब्रवीत्।

रामोऽपि परमोदारः सुमुखः सुमहायशा॥ ३६

*tvameva rājā dharmajñaḥ iti rāmaṁ vaco'bravīt |*
*rāmo'pi paramodāraḥ sumukhaḥ sumahāyaśā||* 36

न चैच्छत् पितुरादेशाद् राजयं रामो महाबलः।

पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः॥ ३७

*na caicchat piturādeśād rājayaṁ rāmo mahābalaḥ|pāduke*
*cāsya rājyāya nyāsaṁ dattvā punaḥ punaḥ ||* 37

निवर्तयामास ततो भरतं भरताग्रजः।

स काममनवाप्यैव रामपादावुपस्पृशन् ॥ ३८

*nivartayāmāsa tato bharataṁ bharatāgrajaḥ |*
*sa kāmamanavāpyaiva rāmapādāvupaspṛśan ||* 38

नन्दिग्रामेऽकरोद् राज्यं रामागमनकाङ्क्षया।

गते तु भरते श्रीमान् सत्यसंधो जितेन्द्रियः॥ ३९

*nandigrāme'karod rājyaṁ rāmāgamanakāṅkṣayā |*
*gate tu bharate śrīmān satyasandho jitendriyaḥ||* 39

रामस्तु पुनरालक्ष्य नागरस्य जनस्य च

तत्रागमनमेकाग्रे दण्डकान् प्रविवेश ह ॥ ४०

*rāmastu punarālakṣya nāgarasya janasya ca*
*tatrāgamanamekāgre daṇḍakān praviveśa ha* || 40

प्रविश्य तु महारण्यं रामो राजीवलोचनः ।

विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ॥ ४१

*praviśya tu mahāraṇyaṁ rāmo rājīvalocanaḥ*|
*virādhaṁ rākṣasaṁ hatvā śarabhaṅgaṁ dadarśa ha* || **41**

सुतीक्ष्णं चाप्यगस्त्यञ्च अगस्त्यभ्रातरं तथा ।

अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् ॥ ४२

*sutīkṣṇaṁ cāpyagastyañca agastyabhrātaraṁ tathā* |
*agastyavacanāccaiva jagrāhaindraṁ śarāsanam* || **42**

खड्गं च परमप्रीतः तूणी चाक्षय सायकौ ।

वसत स्तस्य रामस्य वने वनचरैः सह ॥ ४३

*khaḍgaṁ ca paramaprītastūṇī cākṣayasāyakau* |
*vasata stasya rāmasya vane vanacaraiḥ saha* || **43**

ऋषयोऽभ्यागमन् सर्वे वधायासुररक्षसाम् ।

स तेषां प्रतिशुश्राव राक्षसानां तथा वने ॥ ४४

*ṛṣayo'bhyāgaman sarve vadhāyāsurarakṣasām* |
*sa teṣāṁ pratiśuśrāva rākṣasānāṁ tathā vane*|| 44

प्रतिज्ञातश्च रामेण वधः संयति राक्षसाम्।

ऋषीणामग्नि कल्पानां दण्डकारण्य वासिनाम्॥ ४५

*pratijñātaśca rāmeṇa vadhaḥ saṁyati rākṣasām*|
*ṛṣīṇāmagni kalpānāṁ daṇḍakāraṇya vāsinām*|| **45**

तेन तत्रैव वसता जनस्थाननिवासिनी।

विरूपिता शूर्पणखा राक्षसी कामरूपिणी॥ ४६

*tena tatraiva vasatā janasthānanivāsinī*|
*virūpitā śūrpaṇakhā rākṣasī kāmarūpiṇī*|| **46**

ततः शूर्पणखावाक्यात् उद्युक्तान् सर्वराक्षसान्।

खरं त्रिशिरसं चैव दूषणं चैव राक्षसम्॥ ४७

*tataḥ śūrpaṇakhāvākyāt udyuktān sarvarākṣasān* |
*kharaṁ triśirasaṁ caiva dūṣaṇaṁ caiva rākṣasam* || **47**

निजघान रणे रामः तेषां चैव पदानुगान्।

वने तस्मिन् निवसता जनस्थान निवासिनाम्॥ ४८

*nijaghāna raṇe rāmaḥ teṣāṁ caiva padānugān* |
*vane tasmin nivasatā janasthāna nivāsinām* || **48**

राक्षसां निहता न्यासन् सहस्राणि चतुर्दश।

ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः॥ ४९

*rākṣasāṁ nihatā nyāsan sahasrāṇi caturdaśa*| **49a**
*tato jñātivadhaṁ śrutvā rāvaṇaḥ krodhamūrcchitaḥ*|| **49**

सहायं वरयामास मारीचं नाम राक्षसम्।

वार्यमाणः सुबहुशो मारीचेन स रावणः॥ ५०

*sahāyaṁ varayāmāsa mārīcaṁ nāma rākṣasam* |
*vāryamāṇaḥ subahuśo mārīcena sa rāvaṇaḥ* || **50**

न विरोधो बलवता क्षमो रावण तेन ते।

अनादृत्य तु तद्वाक्यं रावणः कालचोदितः॥ ५१

*na virodho balavatā kṣamo rāvaṇa tena te* |
*anādṛtya tu tadvākyaṁ rāvaṇaḥ kālacoditaḥ* || **51**

जगाम सहमारीचः तस्याश्रमपदं तदा।

तेन मायाविना दूरमपवाह्य नृपात्मजौ॥ ५२

*jagāma sahamārīcaḥ tasyāśramapadaṁ tadā* |
*tena māyāvinā dūramapavāhya nṛpātmajau* || **52**

जहार भार्यां रामस्य गृध्रं हत्वा जटायुषम्।

गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम्॥ ५३

*jahāra bhāryāṁ rāmasya gṛdhraṁ hatvā jaṭāyuṣam* |
*gṛdhraṁ ca nihataṁ dṛṣṭvā hṛtāṁ śrutvā ca maithilīm* || *53*

|

राघव श्शोकसन्तप्तो विललापाऽऽकुलेन्द्रियः।

ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषम्॥ ५४

*rāghava śśokasantapto vilalāpā'kulendriyaḥ* |
*tatastenaiva śokena gṛdhraṁ dagdhvā jaṭāyuṣam* || **54**

मार्गमाणो वने सीतां राक्षसं सन्ददर्श ह ।
कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥ ५५

*mārgamāṇo vane sītāṁ rākṣasaṁ sandarśa ha* |
*kabandhaṁ nāma rūpeṇa vikṛtaṁ ghoradarśanam* || **55**

तं निहत्य महाबाहुः ददाह स्वर्गतश्च सः ।
स चास्य कथयामास शबरीं धर्मचारिणीम् ॥ ५६

*taṁ nihatya mahābāhuḥ dadāha svargataśca saḥ* |
*sa cāsya kathayāmāsa śabarīṁ dharmacāriṇīm* || **56**

श्रमणीं धर्मनिपुणां अभिगच्छेति राघव ।
सोऽभ्यगच्छन् महातेजाः शबरीं शत्रुसूदनः ॥ ५७

*śramaṇīṁ dharmanipuṇām abhigaccheti rāghava* |
*so'bhyagacchan mahātejāḥ śabarīṁ śatrusūdanaḥ* || *57*

शबर्या पूजितः सम्यक् रामो दशरथात्मजः ।
पम्पातीरे हनुमता सङ्गतो वानरेण ह ॥ ५८

*śabaryā pūjitaḥ samyak rāmo daśarathātmajaḥ* |
*pampātīre hanumatā saṅgato vānareṇa ha* || **58**

हनुमद्वचनाच्चैव सुग्रीवेण समागतः ।
सुग्रीवाय च तत्सर्वं शंसद्रामो महाबलः ॥ ५९

*hanumadvacanāccaiva sugrīveṇa samāgataḥ* |
*sugrīvāya ca tatsarvaṁ śaṁsadrāmo mahābalaḥ* || **59**

आदित स्तद्यथा वृत्तं सीतायाश्च विशेषतः ।

सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः ॥ ६०

*ādita stad-yathā vṛttaṁ sītāyāśca viśeṣataḥ* ।
*sugrīvaścāpi tatsarvaṁ śrutvā rāmasya vānaraḥ* ।। **60**

चकार सख्यं रामेण  प्रीतिश्चैवाग्निसाक्षिकम् ।

ततो वानरराजेन वैरानुकथनं प्रति ॥ ६१

*cakāra sakhyaṁ rāmeṇa  prītiścaivāgnisākṣikam* ।
*tato vānararājena vairānukathanaṁ prati* ।। **61**

रामायावेदितं सर्वं प्रणयाद् दुःखितेन च ।

प्रतिज्ञातं च रामेण  तदा वालिवधं प्रति ॥ ६२

*rāmāyāveditaṁ sarvaṁ praṇayād duḥkhitena ca* ।
*pratijñātaṁ ca rāmeṇa  tadā vālivadhaṁ prati* ।। **62**

वालिनश्च बलं तत्र कथयामास वानरः ।

सुग्रीवः  शङ्कितश्चासीत् नित्यं वीर्येण राघवे ॥ ६३

*vālinaśca balaṁ tatra kathayāmāsa vānaraḥ* ।
*sugrīvaḥ  śaṅkitaścāsīt nityaṁ vīryeṇa rāghave* ।। *63*

राघव प्रत्ययार्थं तु दुन्दुभेः कायमुत्तमम् ।

दर्शयामास सुग्रीवो महापर्वत सन्निभम् ॥ ६४

*rāghava pratyayārthaṁ tu dundubheḥ kāyamuttamam* ।
*darśayāmāsa sugrīvo mahāparvata sannibham* ।। **64**

उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः ।

पादाङ्गुष्ठेन चिक्षेप सम्पूर्णं दशयोजनम् ॥ ६५

*utsmayitvā mahābāhuḥ prekṣya cāsthi mahābalaḥ* ।
*pādāṅguṣṭhena cikṣepa sampūrṇaṁ daśayojanam* ॥ **65**

बिभेद च पुनस्सालान् सप्तैकेन महेषुणा ।

गिरिं रसातलं चैव जनयन् प्रत्ययं तदा ॥ ६६

*bibheda ca punassālān saptaikena maheṣuṇā* ।
*giriṁ rasātalaṁ caiva janayan pratyayaṁ tadā* ॥ **66**

ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः ।

किष्किन्धां रामसहितो जगाम च गुहां तदा ॥ ६७

*tataḥ prītamanāstena viśvastaḥ sa mahākapiḥ* ।
*kiṣkindhāṁ rāmasahito jagāma ca guhāṁ tadā* ॥ **67**

ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः ।

तेन नादेन महता निर्जगाम हरीश्वरः ॥ ६८

*tato'garjaddharivaraḥ sugrīvo hemapiṅgalaḥ* ।
*tena nādena mahatā nirjagāma harīśvaraḥ* ॥ **68**

अनुमान्य तदा तारां सुग्रीवेण समागतः ।

निजघान च तत्रैनं शरेणैकेन राघवः ॥ ६९

*anumānya tadā tārāṁ sugrīveṇa samāgataḥ* ।
*nijaghāna ca tatrainaṁ śareṇaikena rāghavaḥ* ॥ **69**

ततः सुग्रीववचनात् हत्वा वालिनमाहवे ।
सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ॥ ७०

*tataḥ sugrīvavacanāt hatvā vālinamāhave |*
*sugrīvameva tadrājye rāghavaḥ pratyapādayat* || 70

स च सर्वान् समानीय वानरान् वानरर्षभः ।
दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् ॥ ७१

*sa ca sarvān samānīya vānarān vānararṣabhaḥ |*
*diśaḥ prasthāpayāmāsa didṛkṣurjanakātmajām* || 71

ततो गृध्रस्य वचनात् सम्पातेर्हनुमान् बली ।
शतयोजन विस्तीर्णं पुप्लुवे लवणार्णवम् ॥ ७२

*tato gṛdhrasya vacanāt sampāterhanumān balī |*
*śatayojanavistīrṇaṁ pupluve lavaṇārṇavam* || 72

तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् ।
ददर्श सीतां ध्यायन्तीं अशोकवनिकां गतम् ॥ ७३

*tatra laṅkāṁ samāsādya purīṁ rāvaṇapālitām |*
*dadarśa sītāṁ dyāyantīm aśokavanikāṁ gatam*|| 73

निवेदयित्वाऽभिज्ञानं प्रवृत्तिं च विनिवेद्य च ।
समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥ ७४

*nivedayitvā'bhijñānaṁ pravṛttiṁ ca vinivedya ca |*
*samāśvāsya ca vaidehīṁ mardayāmāsa toraṇam* || 74

पञ्च सेनाग्रगान् हत्वा सप्तमन्त्रिसुतानपि ।

शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ॥ ७५

*pañcasenāgragān hatvā saptamantrisutānapi* I
*śūramakṣaṁ ca niṣpiṣya grahaṇaṁ samupāgamat* II **75**

अस्त्रेणोन्मुक्त मात्मानं ज्ञात्वा पैतामहा  द्वरात् ।

मर्षयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया ॥ ७६

*astreṇonmukta mātmānaṁ jñātvā paitāmahā  dvarāt* I
*marṣayan rākṣasān vīro yantriṇastān yadṛcchayā* II **76**

ततो दग्ध्वा पुरीं लङ्कां ऋते सीतां च मैथिलीम् ।

रामाय प्रिय माख्यातुं पुनरायान् महाकपिः ॥ ७७

*tato dagdhvā purīṁ laṅkāṁ ṛte sītāṁ ca maithilīm* I
*rāmāya priya mākhyātuṁ punarāyān mahākapiḥ* II **77**

सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् ।

न्यवेदयत् अमेयात्मा दृष्टा  सीतेति तत्त्वतः ॥ ७८

*so'bhigamya mahātmānaṁ kṛtvā rāmaṁ pradakṣiṇam* I
*ṇyavedayat ameyātmā dṛṣṭā  sīteti tattvataḥ* II **78**

ततः सुग्रीवसहितो गत्वा तीरं महोदधेः ।

समुद्रं क्षोभयामास शरैरादित्य सन्निभैः ॥ ७९

*tataḥ sugrīvasahito gatvā tīraṁ mahodadheḥ* I
*samudraṁ kṣobhayāmāsa śarairāditya sannibhaiḥ* II **79**

दर्शयामास चात्मानं समुद्रः सरितां पतिः ।

समुद्रवाचनाच्चैव नलं सेतुमुकारयत् ॥ ८०

*darśayāmāsa cātmānaṁ samudraḥ saritāṁ patiḥ* ǀ
*samudravācanāccaiva nalaṁ setumukārayat* ǀǀ **80**

तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे ।

रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥ ८१

*tena gatvā purīṁ laṅkāṁ hatvā rāvaṇamāhave* ǀ
*rāmaḥ sītāmanuprāpya parāṁ vrīḍāmupāgamat* ǀǀ **81**

तामुवाच ततो रामः परुषं जनसंसदि ।

अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥ ८२

*tāmuvāca tato rāmaḥ paruṣaṁ janasaṁsadi* ǀ
*amṛṣyamāṇā sā sītā viveśa jvalanaṁ satī* ǀǀ **82**

ततोऽग्निवचनात् सीतां ज्ञात्वा विगतकल्मषाम् ।

बभौ रामः सम्प्रहृष्टः पूजितः सर्वदैतैः ॥ ८३

*tato'gnivacanāt sītāṁ jñātvā vigatakalmaṣām* ǀ
*babhau rāmaḥ samprahṛṣṭaḥ pūjitaḥ sarvadaitaiḥ* ǀǀ **83**

कर्मणा तेन महता त्रैलोक्यं सचराचरम् ।

सदेवर्षिगणं तुष्टं राघवस्य महात्मनः ॥ ८४

*karmaṇā tena mahatā trailokyaṁ sacarācaram* ǀ
*sadevarṣigaṇaṁ tuṣṭaṁ rāghavasya mahātmanaḥ* ǀǀ **84**

अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम्।

कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह॥ ८५

*abhiṣicya ca laṅkāyāṁ rākṣasendraṁ vibhīṣaṇam* |
*kṛtakṛtyastadā rāmo vijvaraḥ pramumoda ha* || 85

देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान्।

अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद् वृतः॥ ८६

*devatābhyo varaṁ prāpya samutthāpya ca vānarān* |
*ayodhyāṁ prasthito rāmaḥ puṣpakeṇa suhṛd vṛtaḥ* || 86

भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः।

भरतस्यान्तिकं रामो  हनूमन्तं व्यसर्जयत्॥ ८७

*bharadvājāśramaṁ gatvā rāmaḥ satyaparākramaḥ* |
*bharatasyāntikaṁ rāmo  hanūmantaṁ vyasarjayat* || 87

पुनराख्यायिकां जल्पन् सुग्रीवसहितश्च सः।

पुष्पकं तत् समामारुह्य नन्दिग्रामं ययौ तदा॥ ८८

*punarākhyāyikāṁ jalpan sugrīvasahitaśca saḥ* |
*puṣpakaṁ tat samāmāruhya nandigrāmaṁ yayau tadā* || 88

नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः।

रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ॥ ८९

*nandigrāme jaṭāṁ hitvā bhrātṛbhiḥ sahito'naghaḥ* |
*rāmaḥ sītāmanuprāpya rājyaṁ punaravāptavān* || 89

प्रहृष्टो मुदितो लोकः तुष्टः पुष्टः सुधार्मिकः।
निरामयो ह्यरोगश्च दुर्भिक्ष भयवर्जितः॥ ९०

*prahṛṣṭo mudito lokaḥ tuṣṭaḥ puṣṭaḥ sudhārmikaḥ* |
*nirāmayo hyarogaśca durbhikṣa bhayavarjitaḥ* || **90**

न पुत्रमरणं किञ्चित् द्रक्ष्यन्ति पुरुषाः क्वचित्।
नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः॥ ९१

*na putramaraṇaṁ kiñcit drakṣyanti puruṣāḥ kvacit* |
*nāryaścāvidhavā nityaṁ bhaviṣyanti pativratāḥ* || **91**

न चाग्निजं भयं किञ्चिन्नाप्सु मज्जन्ति जन्तवः।
न वातजं भयं किञ्चिन्नापि ज्वरकृतं तथा॥ ९२

*na cāgnijaṁ bhayaṁ kiñcinnāpsu majjanti jantavaḥ* |
*na vātajaṁ bhayaṁ kiñcinnāpi jvarakṛtaṁ tathā* || **92**

न चापि क्षुद्भयं तत्र न तस्करभयं तथा।
नगराणि च राष्ट्राणि धनधान्ययुतानि च॥ ९३

*na cāpi kṣudbhayaṁ tatra na taskarabhayaṁ tathā* |
*nagarāṇi ca rāṣṭrāṇi dhanadhānyayutāni ca* || **93**

नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा।
अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः॥ ९४

*nityaṁ pramuditāḥ sarve yathā kṛtayuge tathā* |
*aśvamedhaśatairiṣṭvā tathā bahusuvarṇakaiḥ* || **94**

गवां कोट्ययुतं दत्त्वा ब्रह्मलोकं प्रयास्यति ।

असंख्येयं धनं दत्त्वा ब्राह्मणेभ्यो महायशाः ॥ ९५

*gavāṁ koṭyayutaṁ dattvā brahmalokaṁ prayāsyati* |
*asaṅkhyeyaṁ dhanaṁ dattvā brāhmaṇebhyo mahāyaśāḥ* ||

राजवंशान् शतगुणान् स्थापयिष्यति  राघवः ।

चातुर्वर्ण्यं चलोकेऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति ॥ ९६

*rājavaṁśān śataguṇān sthāpayiṣyati  rāghavaḥ* |
*cāturvarṇyaṁ caloke'smin sve sve dharme niyokṣyati* || 96

दशवर्ष सहस्राणि दशवर्ष शतानि च ।

रामो राज्य मुपासित्वा ब्रह्मलोकं प्रयास्यति ९७

*daśavarṣa sahasrāṇi daśavarṣa śatāni ca*|
*rāmo rājyamupāsitvā brahmalokaṁ prayāsyati* || *97*

इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम् ।

यः पठे द्रामचरितं सर्वपापैः प्रमुच्यते ॥ ९८

*idaṁ pavitraṁ pāpaghnaṁ puṇyaṁ vedaiśca sammitam* |
*yaḥ paṭhe drāmacaritaṁ sarvapāpaiḥ pramucyate* || 98

एतदाख्यान मायुष्यं  पठन् रामायणं नरः ।

सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥ ९९

*etadākhyāna māyuṣyaṁ  paṭhan rāmāyaṇaṁ naraḥ*  |
*saputrapautraḥ sagaṇaḥ pretya svarge mahīyate* || 99

पठन् द्विजो वागृषभत्वमीयात्

स्यात् क्षत्रियो भूमिपतित्वमीयात्।

वणिग्जनः पण्यफलत्वमीयात्

जनश्च शूद्रोऽपि महत्त्वमीयात्॥ १००

***paṭhan dvijo vāgṛṣabhatvamīyāt***
***syāt kṣatriyo bhūmipatitvamīyāt*** **।**
***vaṇigjanaḥ paṇyaphalatvamīyāt***
***janaśca śūdro'pi mahattvamīyāt*** **।। 100**

*इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे संक्षेपो नाम प्रथमः सर्गः।*

*ityārṣe śrīmadrāmāyaṇe vālmīkīye ādikāvye bālakāṇḍe saṅkṣepo nāma prathamaḥ sargaḥ*।

Thus ends the first canto called "Saṅkṣepa Rāmāyaṇa" of Bālakāṇḍa of the Glorious Rāmāyaṇa, the very first epic in poetic rendition of Vālmīki Ṛṣi.